PDF brought to you by ResPaper.com

# ICSE 2011 : SANSKRIT

**Answer key / correct responses on:**

Click link: http://www.respaper.com/icse/774/807.pdf

Other papers by ICSE : http://www.respaper.com/icse/

**Upload and share your papers and class notes on ResPaper.com. It is FREE!**
**ResPaper.com has a large collection of board papers, competitive exams and entrance tests.**

http://www.respaper.com/

# SANSKRIT

*(Three hours)*

***Answers to this Paper must be written on the paper provided separately.***
*You will **not** be allowed to write during the first 15 minutes.*
*This time is to be spent in reading the question paper.*
***The time given at the head of this Paper is the time allowed for writting the answers.***

*This paper comprises of two Sections; **Section A** and **Section B**.*
*Attempt **all** the questions from Section A.*
*Attempt **any four** questions from Section B, answering at least **one** question each from the **two** books you have studied and any **two** other questions.*
*The intended marks for questions or parts of questions are given in brackets [ ].*

## SECTION - A (40 MARKS)

*(Attempt ALL Questions)*

### Question 1.

**Write a short composition in Sanskrit of 150-200 words on any one of the following topics :-** [15]

अधोलिखितेषु विषयेषु एकं विषयं आधृत्य 150-200 शब्दपरिमितं एकं लघुनिबन्धं संस्कृतभाषया लिखत :-


(*i*) प्रकृति मानवाय दैवदत्तम् अमूल्यं वरदानम्। प्रकृति अस्मभ्यं कीदृशं सन्देश ददाति। अस्माभिः प्रकृतेः संरक्षणं कथं करणीयम्। विवृणुत।

(*ii*) मानव जीवने मित्राणां महत्वं किम् ? ते व्यक्तेः जीवनं प्रति कीदृशं प्रभावं कुर्वन्ति। लिखत।

(*iii*) दुर्लभं भारते जन्म। अस्य उक्तेः आधारेण प्रबन्धमेकं लिखत।

(*iv*) भारतं गणतन्त्र देशमस्ति। गणतन्त्र शब्दस्य अर्थं लिखन् गणतन्त्रदिवसं प्रति प्रबन्धमेकं लिखत।

(*v*) (Picture composition) प्रस्तुतं चित्रं आधृत्य संस्कृतभाषया एकं लघुनिबन्धं लिखत :-



Click for Answer Key: http://www.respaper.com/icse/774/807.pdf

**Question 2.**

Write a letter in Sanskrit on any one of the following topics :- [7]

अधोलिखितयोः विषययोः एकं विषयम् आधृत्य **संस्कृतभाषया** पत्रमेकं लिखत :-

(*i*) भवान्/भवती कंप्यूटरं त्यक्त्वा अर्थशास्त्रं पठितुम् इच्छति। विषयपरिवर्तनार्थं भवतः/भवत्याः प्रधानाचार्यं प्रति पत्रं लिखतु तथा विषय परिवर्तनस्य कारणमपि लिखतु।

(*ii*) शरदावकाश काले विद्यालयस्य मित्रैः सार्धं जनसेवाकायोर्थं गन्तुं अनुमतिं प्रार्थयन् पितरम् उद्दिश्य पत्रमेकं लिखत।

**Question 3.**

Read the passage given below and answer in Sanskrit the questions that follow, using your own words as far as possible :-

अधोलिखितं अनुच्छेदं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि यथासंभवं **स्वशब्देषु संस्कृतभाषया** देयानि :-

एकदा रात्रौ साबरमतिस्थस्य आश्रमस्य पाकमन्दिरं प्रविष्टवान् कश्चन चौरः। सः यदा किमपि चोरयन् आसीत् तदा तम् आश्रमवासिनः गृहीतवन्तः। आश्रमे चौर्यं कर्तुम् उद्यतस्य तस्य विषये सर्वेषां महान् क्रोधः आसीत्। अतः सः सम्यक् प्रहृतः अपि। 'एषः इदानीम् एव आरक्षाधीनः करणीयः।' इति अभिप्रायं प्रकटितवन्तः केचन। किन्तु गान्धिवर्यस्य अनुज्ञां विना तत् असाध्यम् आसीत्।

अतः अग्रिमे दिवसे प्रातः काले महात्मा गान्धिवर्यः उपाहारस्वीकरणाय यदा तत्र आगच्छत् तदा आश्रमवासिभिः सः चौरः कथं बद्धः इत्यादिकं गान्धिवर्यं विस्तरेण श्रावितवन्तः ते।

सर्वं श्रुत्वा गान्धिवर्यः अपृच्छत्- ''एतस्मै उपाहारः दत्तः भवद्भिः उत न ?'' इति।

''उपाहारः कोऽपि न दत्तः'' इति अवदत् आश्रमवासिनः।

''चौरस्य उपाहारदानदिसत्कारः किमर्थम् ?'' इति सक्रोधं अपृच्छत् कश्चन आश्रमवासी।

गान्धिवर्यः तं सकृत् गम्भीरतया अपश्यत्। क्षणं विरम्य सः-''आदौ एतस्मै उपाहारः दीयताम्। तत्पश्चात् एषः मत्समीपम् आनेतव्यः'' इति आज्ञापयत्।

तथैव कृतं तैः आश्रमवासिभिः। ततश्च पुरतः आगतं चौरं स्वपार्श्वे उपवेश्य गान्धिवर्यः सुमधुरैः वचोभिः अवदत्-'भ्रातः, चोर्यकरणं महते पापाय। निर्धनत्वेन बाधितः सन् भवान् एवं कर्तुम् उद्यतः स्यात् इति भावयामि अहम्। निर्धनता सर्वपापमूला इति अहं जानामि। सा अनिच्छतः अपि जनस्य द्वारा पापकार्याणि कारयति। एवं ननु ?''

गान्धिवर्यस्य मृदुना व्यवहारेण सः चौरः आश्चर्यचकितः। गान्धिवर्ये चौर्यस्य वास्तविकं कारणं यत् ऊहितं तत् तस्मिन् आश्चर्यम् अजनयत्। गान्धिवर्यस्य मुखं निर्निमेषं पश्यन् सः मौनेन अतिष्ठत्।

गान्धिवर्यः एव पुनः अवदत्-''मित्र, अलं चिन्तया। अहम् अस्मिन् एव आश्रमे तुभ्यं कार्यं दास्यामि। एतच्च दुष्कार्यं त्यज। अस्माभिः सह साधुजीवनं यापय। एतत् अनुमतं भवतः ?'' इति।

महात्मनः गान्धिवर्यस्य एतानि वचनानि श्रुत्वा द्रवीभूतान्तः करणः सः चौरः गान्धिवर्यस्य रपादौ गृह्णन् अश्रूणि स्रावितवान्। ततः सः आश्रमे एव निवसन् सर्वाणि कार्याणि श्रद्धया कुर्वन् उत्तमं जीवनं यापयन् साधुजनः अभवत्।

(*i*) गान्धिवर्यस्य अनुज्ञां विना किम् असाध्यम् आसीत् ? किमर्थं साबरमतिस्थस्य आश्रमवासिन : गान्धिमहोदयस्य अनुज्ञां ऐच्छन् ? [2]

(*ii*) आनीतं चौरं दृष्ट्वा गान्धिवर्यस्य प्रतिक्रिया कीदृशी ? [2]

(*iii*) निर्धनता पापमूला भवति इति गांधिवर्यः कथं अवदत् ? [2]

(*iv*) चौरः गान्धिवर्यस्य मुखं निर्निमेषं पश्यन् मौनेन अतिष्ठत्। कदा किमर्थं च ? [2]

Click for Answer Key: http://www.respaper.com/icse/774/807.pdf

(*v*) आश्रमस्य पाकगृहं प्रविष्टं पुरुषं प्रति गान्धिवर्यः कीदृशं सान्त्वनं कृतवान् ? [2]

**Question 4.**

Answer the following according to the instructions given :-

अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत :-

(*i*) केवलं समासविग्रहं कुरुत :-

(क) शुष्ककण्ठः, (ख) सत्पुरुषाः [1]

(*ii*) प्रकृति-प्रत्यय विभाजनं कृत्वा लिखत :-

(क) लभनीयः (ख) पठित्वा। [1]

(*iii*) वाक्यदोषान् परिहरत :-

(क) सीता मातुः सह गच्छति।

(ख) वयं गृहे अधितिष्ठामः। [1]

(*iv*) सन्धि-विच्छेदं कुरुत :-

(क) श्रीरामलक्ष्मणादीनाम्।

(ख) वसन्तोत्सवः [1]

(*v*) वाच्य परिवर्तनं कुरुत :-

(क) सः आम्रफलं खादितवान्। [1]

(*vi*) लृट लकारे परिवर्तनं कुरुत :-

(क) ते शीघ्रं चित्राणि पश्यन्ति।

(ख) प्रथमस्थानं कदा लभते ? [1]

(*vii*) कोष्ठकान्तर्गतस्य शब्दस्य उचितं रूपं निर्माय रिक्तस्थानं पूरयत :-

(क) ते बालिके ......................... एव अपठताम्। (गृहम्)

(ख) ......................... उभयत : गोपिका : सन्ति। (श्रीकृष्ण) [1]

(*viii*) हल् नाम किम् ?

## SECTION – B (40 MARKS)

*Attempt any four questions from Section B, answering atleast one question each from the two books you have studied and any two other questions.*

### संस्कृतवाणी-भाग-4

### छात्र- शिक्षणम्

**Question 5.**

Read the extract given below and answer in Sanskrit the questions that follow :-

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया देयानि :-

छात्रेभ्यः राजनीतिः वर्जनीया। एषा तेषाम् अमूल्यं समयं नाशयति। शिक्षणस्य लक्षणं मानुषता। मानुषता गौरव-प्राप्त्यर्थं साहाय्यं करोति। गोरवात् धनं लभते। धनस्य उपयोगः धर्मार्जनार्थम् एव करणीयः।

भो छात्राः! 'अस्मात् क्षणात् वयं निर्दोषवन्तः प्रियाः विद्यार्थिनः भवेम' इति संकल्पं कुरुथ। स्वकार्याणि सम्यक् रीत्या आनन्दोत्साहेन कृत्वा मातापितृन् गुरुजनान् तोषयथ।

Click for Answer Key: http://www.respaper.com/icse/774/807.pdf

(*i*) यथार्थ विद्या का ? अस्या: विद्याया: लाभ: क: ? [2]

(*ii*) मानुषता किमर्थमावश्यकम् ? [2]

(*iii*) छात्रा: कदा सदाचारिण: सुसंस्कारवन्त: च भविष्यन्ति ? [3]

(*iv*) आधुनिक शैक्षणिक पद्धति विषये परिवर्तनम् भवेत् कथम् ? एतदर्थं केषां साहाय्यं आवश्यकम् ? [3]

## वसुधैव कुटुम्बकम्

**Question 6.**

Read the extract given below and answer in Sanskrit the questions that follow :-

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :-

मानवस्य स्वाभाविकी चेष्टा परहितचिन्तनम् अस्ति। स: स्वप्राणान् तृणीकृत्य जनानां सेवां करोति। अस्माकं पुण्यभूमि:, त्यागभूमि:, वीरभूमि: भारतवर्षम् 'बहुजनहिताय' 'बहुजनस्य सुखाय' महदुद्देश्ये सदा निरतमस्ति। भारतीयजनेषु 'वसुधैव कुटुम्बकस्य' भावना दृढास्ति।

परोपकार-निस्वार्थपर-भारतदेशे अनेके महापुरुषा: जन्म लब्ध्वा देशसेवाम् अकुर्वन्।

(*i*) भारतीय जनानामनुसारेण भारत देश: महान् अस्ति। कथम् ? [2]

(*ii*) अयं निज: परो वेत्ति गणनां लघुचेतसाम्।

उदारचरितानां तु वसुधैव कुटुम्बकम्। अस्य श्लोकस्य तात्पर्यं लिखत। [2]

(*iii*) अधमवृत्तीनां जनानां प्रति किं कथितम् अस्मिन् पाठे ? वाक्यत्रये लिखत। [3]

(*iv*) किं करणेन विश्वस्य कल्याणं भवति ? [3]

## अमृतधारा

**Question 7.**

Write in Sanskrit the summary of the verses given below :-

अधोलिखितं श्लोकानां तात्पर्यं **संस्कृतभाषया** लिखत :-

(*i*) व्याधितस्यार्थहीनस्य देशान्तरगतस्य च।
नरस्य शोकदग्धस्य सुहृद्दर्शनमौषधम्।। [2]

(*ii*) प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मन:।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति।। [2]

(*iii*) छिन्नोऽपि चन्दनतरु: न जहाति गन्धम्
वृद्धोऽपि वाऽपणपति: न जहाति लाभम्।
यन्त्रार्पितो मधुरतां न जहाति चेक्षु:
क्षीणोऽपि न त्यजति शीलगुणान् कुलीन:।। [3]

(*iv*) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला:
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजा:।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।। [3]

Click for Answer Key: http://www.respaper.com/icse/774/807.pdf

## संस्कृतवाणी-भाग-5

### चतुर : रामकृष्ण :

**Question 8.**

Read the extract given below and answer in Sanskrit the Questions that follow :-

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :-

पुरा कर्नाटक राज्ये अनेके प्रसिद्धाः राजानः आसन्। तेषु विजयनगर-साम्राज्यस्य प्रसिद्धः राजा श्रीकृष्णदेवरायः अनन्यतमः। तस्य राज्यं सुसमृद्धम् आसीत्। अनेके प्रसिद्धाः कवयः पण्डिताः च तस्य सभायाः अमूल्यानि रत्नानि आसन्। तेषु हास्यकविः रामकृष्णमहोदयः समस्त देशे प्रसिद्धः आसीत्। कालीदेव्याः कृपा-कटाक्षं लब्धवा सः "विकटकवि" इति नाम्ना विख्यातोऽभवत्।

(*i*) तेनालि रामकृष्णाय कः आश्रयं दत्तवान् ? सः कः ? तस्य सभा कीदृशी आसीत् ? [2]

(*ii*) रामकृष्णः कथं विकटकविः अभवत् ? सः तस्य प्रतिभायाः सदुपयोगं कथं करोति स्म ? [2]

(*iii*) नायकं प्रति रामकृष्णः वाक्यमेकम् अवदत्। कारणद्वयं लिखत। तस्य परिणामं किमासीत् ? [3]

(*iv*) नरभक्षकाः केन निमित्तेन नायकं उपस्थिताः ? [3]

### युक्तिः शक्तेः गरीयसी

**Question 9.**

Read the extract given below and answer in Sanskrit the Questions that follow :-

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :-

अस्मिन् लोके निर्भयेन सुखेन च जीवितुं बलिष्ठात् शरीरात् तीक्ष्णबुद्धिः चातुर्यं च आवश्यकम्। विना बुद्धिशक्ति सुदृढशरीरेण किम् ? "युक्तिः शक्तेः गरीयसी"। इदम् आभणकम् आधारीकृत्य एका कथा अत्र दत्ता।

पुरा जनसंख्या न्यूना आसीत्। न केवलं वनानां संख्या अधिका आसीत् अपितु तानि सान्द्राणि आसन्। तेषु वनेषु अनेके वनमृगाः निर्भयेन आवासं कृत्वा सुखेन जीवन्ति स्म।

(*i*) 'युक्ति शक्तेः गरीयसी' अस्य उक्तेः अर्थं किम् ? [2]

(*ii*) कुशालः कीदृशः युवकः ? [2]

(*iii*) दर्पणे स्वप्रतिबिम्बं दृष्ट्वा भीतः राक्षसः काम् प्रतिज्ञां कृतवान् ? [3]

(*iv*) राक्षसः कण्टकसदृशः कथम् आसीत् ? ग्रामवासिनः किमर्थं प्रसन्नाः अभवन् ? [3]

### अमृतवाहिनी

**Question 10.**

Read the extract given below and answer in Sanskrit the questions that follow :-

अधोलिखितान् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :-

अमरुक-भर्तृहरि-प्रभृतिभिः साहित्यकारैः एतदर्थं शतकसाहित्यम् एव विरचितम्। तेषां कृतिषु रम्याणि सुभाषितानि लभ्यन्ते।

Click for Answer Key: http://www.respaper.com/icse/774/807.pdf

सुभाषितरत्न-भाण्डागार-सूक्तिमुक्तावली-सदुक्ति-कर्णामृतसदृशग्रन्थेषु प्रसिद्धकवीनां सुभाषितानि सन्ति। सुभाषितनि अस्मान् व्यावहारचातुर्यं बोधयन्ति, तत्वं च उपदिशन्ति।

(*i*) सुभाषितं कीदृश रूपेण मानवाय साहाय्यं करोति ? [2]

(*ii*) सज्जनदुर्जनयोः आचरणं कीदृशं भवति इति स्पष्टीकुरुत। [2]

(*iii*) अस्माभिः कृतानि पुण्यकार्याणि कथं अस्मान् रक्षन्ति ? [3]

(*iv*) सन्तोष एव पुरुषस्य परं निधानम्। इयं उक्तिः कथं वर्णिता अस्मिन् पाठे। [3]